# Shravanakalah

# શ્રાવણકાલઃ

## Document Information

Text title : Shravanakalah

File name : shrAvaNakAlaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : vijayan vi. paTTAmbI

Acknowledge-Permission: Vijayan V. Pattambi

Latest update : August 11, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 12, 2024

*sanskritdocuments.org*

# શ્રાવણકાલઃ

ગગનમશ્રુવિમુક્તં પશ્યત
શ્રાવણકાલઃ સમ્પ્રાપ્તઃ ।
પુષ્પાણાં હા સુરભિલગન્ધઃ
પુષ્યતિ માનસમસ્માકમ્ ॥

રજતકકાન્તિસમેતં વાનં
શ્રાવણરજની હ્યાયાતા ।
મધુના મત્તાઃ ચિત્રપતઙ્ગાઃ
માદકકેલિષુ સંલગ્નાઃ ॥

ધાન્યં બહુતરં સમ્ભૃતમેતત્
કર્ષકચિત્તં હર્ષભરમ્ ।
હા! હા! પશ્યત શ્રાવણકાલઃ
માનવચિત્તમિહાયાતઃ ॥

ડિણ્ડિમિ ડિણ્ડિં નાદં શ્રૃણુત
શ્રાવણવ્યાઘ્રાઃ વિલસન્તિ ।
તિત્તૈ તિત્તૈ ઘોષં શ્રૃણુત
નૌકાકેલિઃ સમારબ્ધા ॥

પૂપ્પોલિ પૂપ્પોલિ ગાનં ભરિતં
બાલાઃ પુષ્પરતાસ્તત્ર ।
હૂ હૂ હૂ હૂ નાદં શ્રૃણુત
દોલાદોલનમારબ્ધમ્ ॥

હા હા પશ્યત શ્રાવણકાલઃ
માનવચિત્તમિહાયાતઃ ।
પીતં સર્વં કદલીવૃન્દં
પક્વં જાતં મધુરતરમ્ ॥

પર્પટભર્જનગન્ધો ભરિતઃ
લાલાવર્ધકશક્તિયુતઃ ।
ક્વથિતં સૂપં ભર્જિતસહિતા
શ્રાવણસગ્ધિઃ સમારબ્ધા ॥

આગચ્છત ભોઃ મિત્રક રુચિતૈઃ
ઉદરં પૂર્ણં કરવામ ।
સુતલાદદ્ય સમાગચ્છન્તં
માબલિરાજં સ્વીકુર્મ ॥

— વિજયન્ વિ. પટ્ટામ્બિ

---

*Shravanakalah*

pdf was typeset on August 12, 2024

Please send corrections to *sanskrit@cheerful.com*